तूणकः-णिका, तुतूणयिषकः-षिका ; तूणयिता-त्री, तुतूणयिषिता-त्री ; [A]तूणितम्-तः-तवान्, इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककूटयतिवत् (240) ज्ञेयानि।

## (762) "तूरी गतित्वरणहिंसनयोः"

(X-दिवादिः-1152. अक. सेट्. आत्म.)

'गतेः त्वरणे, हिंसने च' इति क्षीरस्वामी। 'तूर' इति दुर्गः। 'त्वरणहिंसनयोः' इति मैत्रेयः। 'त्वरणमात्रे च द्रुमे।' इति धा. का. व्याख्यायाम् (2.59)।

तूरकः-रिका, तूरकः-रिका, तुतूरिषकः-षिका, तोतूरकः-रिका ; इत्यादीनि सर्वाण्यपि रूपाणि दैवादिकगूर्यतिवत् (419) ज्ञेयानि। [B]तूर्णम्-कर्मणि क्तः।

## (763) "तूल निष्कर्षे" (I-भ्वादिः-527. सक. सेट्. पर.)

निष्कर्षः=निष्कोषणम्। तच्च, अन्तर्गतस्य बहिर्निस्सारणम्।

| | | | |
|---|---|---|---|
| तूलकः-लिका, | तूलकः-लिका, | तुतूलिषकः-षिका, | तोतूलकः-लिका ; |
| तूलिता-त्री, | तूलयिता-त्री, | तुतूलिषिता-त्री, | तोतूलिता-त्री ; |
| तूलन्-न्ती, | तूलयन्-न्ती, | तुतूलिषन्-न्ती ; | — |
| तूलिष्यन्-न्ती-ती, | तूलयिष्यन्-न्ती-ती, | तुतूलिषिष्यन्-न्ती-ती ; | — |
| — | तूलयमानः, | — | तोतूल्यमानः ; |
| — | तूलयिष्यमाणः, | — | तोतूलिष्यमाणः ; |
| तूल्-तूलौ-तूलः ; | — | — | — |
| तूलितम्-तः, | तूलितः, | तुतूलिषितः, | तोतूलितः-तवान् ; |
| तूलः, [1]इषीकतूलम्, तूलः, | | तुतूलिषुः, | तोतूलः ; |
| तूलितव्यम्, | तूलयितव्यम्, | तुतूलिषितव्यम्, | तोतूलितव्यम् ; |
| तूलनीयम्, | तूलनीयम्, | तुतूलिषणीयम्, | तोतूलनीयम् ; |

1. इगुपधलक्षणे कप्रत्यये 'इष्टकेषीकामालानां चिततूलभारिषु' (6-3-65) इति पूर्वपदस्य ह्रस्वः। पदाधिकारत्वात् 'पदाङ्गाधिकारे तस्य च तदन्तस्य च' (परिभाषा 30) इति वचनात् 'मुञ्जेषीकतूलम्' इत्यत्रापि पूर्वपदस्य ह्रस्वः।

A. 'आकूणिताक्षमपि च स्मिततूणितास्यं भ्रणस्य शाठ्यजनयक्ष्यमवेक्ष्य गात्रम्।' धा. का. 3. 35.

B. 'धर्मावसायजनदः खलु योऽजनिष्ट दीप्तोष्मपूर्णभुजतूर्णविधूर्णवैरी ॥' धा.का. 2.59.